~~इतिहास~~ संस्कृत पुराण

क्रं. नं. १६

3877

भागवतांतर्गत — वेणुगीत

७१० | पृ. ५

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(1)

श्रीगणेशायनमः ॥ गोप्य ऊचुः ॥ जयतितेधि
कंजन्मनाव्रजः श्रयतइंदिरा शश्वदत्रहि ॥
दयितदृश्यतांदिक्षुतावकास्त्वयिधृतासव
स्त्वांविचिन्वते ॥१॥ व्रजजनार्तिहन्वीरयो
षितांनिजजनस्मयध्वंसनस्मित ॥ भजसखे
भवत्किंकरीःस्मनोजलरुहाननंचारुदर्शय
॥२॥ शरदुदाशयेसाधुजातसत्सरसिजो
दरश्रीमुषादृशा ॥ सुरतनाथतेऽशुल्कदासि
कावरदनिघ्नतोनेहकिंवधः ॥३॥ विषज
लाप्ययाद्व्यालराक्षसाद्वर्षमारुताद्वैद्युता
नलात् ॥ वृषमयात्मजाद्विश्वतोभयादृष
भतेवयंरक्षितामुहुः ॥४॥ नखलुगोपि

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(२) श्री

गो०

कानंदनो भवानखिलदेहिनामंतरात्मदृ
क्॥ विखनसार्थितो विश्वगुप्तये सख
उदेयिवान् सात्वतां कुले ॥५॥ विरचिता
भयं वृष्णिधुर्य ते चरणमीयुषां संसृतेर्भ
यात्॥ करसरोरुहं कांत कामदं शिरसि
१ धेहि नः श्रीकरग्रहं ॥ प्रणतदेहिनां पा
पकर्शनं तृणचरानुगं श्रीनिकेतनं॥ फ
णिफणार्पितं ते पदांबुजं कृणु कुचेषु नः
कृंधि हृच्छयं ॥७॥ मधुरया गिरा वल्गुवा ३
क्यया बुधमनोज्ञया पुष्करेक्षण ॥ विधि
करीरिमा वीर मुह्यतीरधरसीधुनाप्या
ययस्व नः॥८॥ तव कथामृतं तप्तजीवनं

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(2A)

कविभिरीडितं कल्मषापहं ॥ श्रवणमंगलं
श्रीमदाततं भुवि गृणंति ये भूरिदा जनाः ॥९॥
प्रहसितं प्रियप्रेमवीक्षितं विहरणं तेध्या च
नमंगलं ॥ रहसि संविदो या हृदिस्पृशः कु
हक नो मनः क्षोभयंति हि ॥१०॥ चलसि य
द्व्रजाच्चारयन्पशून्नलिनसुंदरं नाथ तेप
दं ॥ शिलतृणांकुरैः सीदतीति नः कलिल
तां मनः कांत गच्छति ॥११॥ दिनपरिक्षये नी
लकुंतलैर्वनरुहाननं बिभ्रदावृतं ॥ घनर
जस्वलं दर्शयन्मुहुर्मनसि नः स्मरं वीर यच्छ
सि ॥१२॥ प्रणतकामदं पद्मजार्चितं धर
णिमंडनं ध्येयमापदि ॥ चरणपंकजं शं

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

तमंचतेरमणनःस्तनेष्वर्पयाधिहन् ॥१३॥
सुरतवर्धनंशोकनाशनंस्वरितवेणुनासु
ष्ठुचुंबितं॥इतररागविस्मारणंनृणांवि
वीर तरनस्तेधरामृतं॥१४॥अटतियद्भवान
२ न्हिकाननंत्रुटियुगायतेत्वामपश्यतां॥कु
टिलकुंतलंश्रीमुखंचतेजडउदीक्षतांपक्ष्म
कृद्दृशां॥१५॥पतिसुतान्वयभ्रातृबांधवा
नतिविलंघ्यतेन्त्यच्युतागताः॥गतिविदस्त
वोद्गीतमोहिताःकितवयोषितःकस्त्यजेन्नि
शि॥१६॥रहसिसंविदंहृच्छयोदयंप्रहसि
ताननंप्रेमवीक्षणं॥बृहदुरश्रियोवीर
वीक्ष्यतेमुहुरतिस्पृहामुह्यतेमनः॥१७ २

Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan Mumbai

(५)

व्रजवनौकसांव्यक्तिरंगतेवृजिनहंत्र्यलं
विश्वमंगलं॥त्यजमनाकनस्त्वत्स्पृहात्म
नांस्वजनहृद्रुजांयन्निषूदनं॥१८॥इ
तिश्रीभागवतेमहापुराणेदशमस्कं
धेएकोनत्रिंशोध्यायांतर्गतंगोपीगीतंस
२ माप्तं॥व्यंकटेशार्पणमस्तु॥ध्रु॥
श्रीशुकउवाच॥इतिगोप्यःप्रगायंत्यः ३
प्रलपंत्यश्चचित्रधा॥रुरुदुःसुस्वरंरा
जन्कृष्णदर्शनलालसाः॥१॥तासामा
विरभूच्छौरिःस्मयमानमुखांबुजः॥पीतां
बरधरःस्रग्वीसाक्षान्मन्मथमन्मथः॥२॥

A joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

श्रीगणेशाय नमः ॥ गोप्युवाच ॥ मधुपकि
तवबंधो मास्पृशास्मान्सपत्न्याः कुचविलु
लितमालाकुंकुमश्मश्रुभिस्त्वं ॥ वहतु मधु
पतिस्तन्मानिनीनां प्रसादं यदुसदसि विडं
ब्यं यस्य दूतस्त्वमीदृक् ॥ १ ॥ सकृदधरसु
धां स्वां मोहिनीं पाययित्वा सुमनस इव स
द्यः सस्त्यजेऽस्मान्भवादृक् ॥ परिचरति कथं त
त्पादपद्मं तु पद्मा ह्यपि बत हृतचेता उत्तम
श्लोकजल्पैः ॥ २ ॥ किमिह बहु षडंघ्रे गा
यसि त्वं यदूनामधिपतिमगृहाणामग्र
तो नः पुराणं ॥ विजयसखसखीनां गा
यतां तत्प्रसंगः क्षपितकुचरुजस्ते कल्प

(61) गी०

भ्र० यंतीष्टमिष्टाः॥३॥ दिविभुवि च रसायां का
स्त्रियस्तत्तदुरापाः कपटरुचिरहासभ्रूवि
जृंभस्य यास्युः॥ चरणरजउपास्ते यस्य
भूतिर्वयं का अपि च कृपणपक्षे ह्युत्तमश्लो
कशब्दः॥४॥ विसृज शिरसि पादं वेद्म्य
हं चाटुकारैरनुनयसारैर्य हिद्वो
१ त्येमुकुंदं॥ स्वकृतइहविसृष्टापत्यपत्यु
हलोका व्यसृजदकृतचेताः किंनु संधे
यमस्य॥५॥ मृगयुरिव कपींद्रं विव्य १
धे यः किरातः स्त्रियमकृत विरूपां स्त्रीजि
तः कामयानां॥ बलिमपि बलियवासं वेद

Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai, joint project

(6A)

विद्वांबंधस्तदलमसितसख्यैर्दुस्त्यजस्त
त्कथार्थः॥१६॥ यदनुचरितलीलाकर्णपी
यूषविप्रुट्सकृददनविधूतद्वंद्वधर्मावि
नष्टाः॥ सपदि गृहकुटुंबं दीनमुत्सृज्य
दीनाबहव इह विहंगा भिक्षुचर्यांचरं
ति॥१७॥ वयमृतमिव जिह्मव्याहृतं श्रद्द
धानाः कुलिकरुतमिवाज्ञाः कृष्णवध्वो
हरिण्यः॥ ददृशुरसकृदेतत्तन्नखस्प
र्शतीव्रस्मररुज उपमंत्रिभण्यतामन्य
वार्ता॥१८॥ प्रियसख पुनरागाः प्रेयसा
प्रेषितः किं वरय किमनुरुंधे माननीयोसि

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

मेगाः ॥ नयसिकथमिहास्मान्दुस्त्यजबं
धुपार्श्वंसततमुरसिसौम्यश्रीर्वधूःसा
कमास्ते ॥१९॥ अपिबतमधुपुर्यामार्यपु
त्रोधुनास्तेस्मरतिसपितृगेहान्सौम्यबंधू
श्चगोपान् ॥ क्वचिदपिसकथानःकिंक
२ रीणांगृणीतेभुजमगुरुसुगंधंमूर्ध्न्यधा
स्यत्कदानु ॥२०॥ श्रीशुकउवाच ॥ अथो
द्धवोनिशम्यैवंकृष्णदर्शनलालसाः ॥ सा २
त्वयन्प्रियसंदेशैर्गोपीरिदमभाषत ॥२१॥
इतिश्रीभागवतेमहापुराणेदशमस्कं
धेपंचचत्वारिंशोध्यायांतर्गतभ्रमरगीतं

श्रीगणेशायनमः ॥ श्रीशुक उवाच ॥ गोप्यः
कृष्णे वनंयाते तमनुद्रुतचेतसः ॥ कृष्णली
लांप्रगायंत्यो निन्युर्दुःखेन वासरान् ॥१॥
गोप्य ऊचुः ॥ वामबाहुकृतवामकपोलो व
ल्गितभ्रुरधरार्पितवेणुः ॥ कोमलांगुलि
भिराश्रितमार्गं गोप्य ईरयति यत्र मुकुंदः
॥२॥ व्योमयानवनिताः सह सिद्धैर्विस्मि
तास्तदुपधार्य सलज्जाः ॥ काममार्गणसम
र्पितचित्ताः कश्मलं ययुरपस्मृतनीव्यः ॥
३॥ हंत चित्रमबलाः शृणुतेदं हारहास उर
सि स्थिरविद्युत् ॥ नंदसूनुरयमार्तजना
नां नर्मदो यर्हि कूजितवेणुः ॥४॥ वृंदशो
व्रजवृषा मृगगावो वेणुवाद्यहृतचेतस आ

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(९)

स॥ दंतदष्टकवला धृतकर्णा निद्रितालिखि
तचित्रमिवासन्॥५॥बर्हिणस्तबकधातु
पलाशैर्बद्धमल्लपरिबर्हविडंब॥कर्हिचित्स
बलआलिसगोपैर्गाः समाह्वयति यमुकुं
२ द॥६॥तर्हिभग्नगतयः सरितोवैतत्पदांबु
जरजोनिलनीतं॥आमक्षतान् पयसिवाबहु
पुण्याः प्रेमवेपितभुजाहृत वेगाः॥७॥अ
नुचरैः समनुवर्णितवीर्य आदिपुरुषइवा
चलभूतिः॥वनचरो गिरितटेषु चरंती
र्वेणुनाह्वयति गाः स यदाहि॥८॥वनल
तास्तरव आत्मनि विष्णुं व्यंजयंत्य इव पुष्प
फलाढ्याः॥प्रणतभारविटपामधुधाराः २
प्रेमहृष्टतनवः ससृजुस्म॥९॥दर्शनीय

(९A)

चित्रचोत्फुल्लमाल्य दिव्यगंधतुलसीमधुमत्तैः॥ अलिकुलैरनुघुष्टगीतमभीष्टमाद्रियय‍र्हिसंधितवेणुः॥ सरसि सारसहंसविहंगाश्चारुगीतहृतचेतसएत्य॥ हरिमुपासत ते यतचित्ता हंत मीलितदृशो धृतमौनाः॥११॥ सहबलः स्रगवतंसविलासः सानुषु क्षितिभृतो व्रजदेव्यः हर्षयन्यर्हि वेणुरवेण जातहर्ष उपरंभति विश्वं॥१२॥ महदतिक्रमणशंकितचेता मंदमंदमनुगर्जति मेघः॥ सुहृदमभ्यवर्षत्सुमनोभिः छायया च विदधत्प्रतपत्रं॥१३॥ विविधगोपचरणेषु विदग्धो वेणुवाद्यमधुरां निजशिक्षां॥ तव सुतः सति यदाधरबिंबे दत्तवेणुरनय

वे. (१०) गी.

तस्वरजातीः॥१४॥ सवनशस्तदुपधार्य
सुरेशाः शक्रशर्वपरमेष्ठिपुरोगाः॥ कवय
आनतकंधरचित्ताः कश्मलंययुरनिश्चितत
त्वाः॥१५॥ निजपदाब्जदलैर्ध्वजवज्रनी
रजांकुशविचित्रललामैः॥ व्रजभुवः शम
यन्खुरतोदं वर्ष्मधुर्यगतिरीरितवेणुः॥१६॥
व्रजति तेन वयं सविलासवीक्षणार्पितमनो
२ भववेगाः॥ कुजगतिं गमिता न विदामः कश्म
लेन वसनं कबरं वा॥१७॥ मणिधरः क्वचि
दागणयन्गा मालया दयितगंधतुलस्याः
॥ प्रणयिनोनुचरस्य कदांसे प्रक्षिपन्भु
जमगायत यत्र॥१८॥ क्वणितवेणुरव २
वंचितचित्ताः कृष्णमीयुरनुकृष्णगृहि

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(10A)

ष्य: ॥ गुणगणार्णमनुगम्य हरिण्यो गोपि
का इव विमुक्तगृहेशा: ॥१९॥ कुंददाम कृ
तकौतुकवेषो गोपगोधनवृतो यमुना
यां ॥ नंदसूनुरनघे तव वत्सो नर्मद: प्रण
यिनां विजहार ॥२०॥ मंदवायुरुपवात्य
नुकूलं मानयन्मलयजस्पर्शेन ॥ वंदिन
स्तमुपदेवगणा ये वाद्यगीतबलिभि: प
रिवव्रु: ॥२१॥ वत्सलो व्रजगवां यदगध्रो वं
द्यमानचरण: पथि वृद्धै: ॥ कृत्स्नगोधनम
पोह्य दिनांते गीतवेणुरनुगेडितकीर्ति: ॥२२॥
उत्सवं श्रमरुचापि दृशीनामुन्नयन्खुररज
श्छुरितस्रक् ॥ दित्सयैति सुहृदाशिष ए
ष देवकीजठरभूरुडुराज: ॥२३॥ मदवि

Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

वे- (11) गी

घूर्णितलोचन ईषन्मानद: स्वसुहृदां वनमा
ली ॥ बदरपांडुवदनो मृदुगंडं मंडयन्कनक
कुंडललक्ष्म्या ॥ २४ ॥ यदुपतिर्द्विरदराज
विहारो यामिनीपतिरिवैष दिनांते ॥ मुदि
तवक्त्र उपयाति दुरंतं मोचयन्व्रजगवां दि
नतापं ॥ २५ ॥ श्रीशुक उवाच ॥ एवं व्रजस्त्रि
यो राजन्कृष्णलीलानुगायती: ॥ रेमिरे
हुस्त्वच्चित्तास्तन्मनस्का महोदया: ॥ २६

२ इति श्रीभागवते महापुराणे दशमस्कंधे त्र
यस्त्रिंशोध्याये वेणुगीतं समाप्तं ॥

३

## मूळ प्रत पाहण्यासाठी संपर्क

---


**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**

राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)

**दूरध्वनी क्रमांक** (०२५६२) २३३८४८

**Email ID** : rajwademandaldhule@gmail.com